# Shriman Narayana AshtAkshari Stutih

# શ્રીમન્નારાયણાષ્ટાક્ષરીસ્તુતિઃ

## Document Information

```
Text title : Narayana AshtAkshari Stuti
File name : nArAyaNAShTAkSharIstutiH.itx
Category : vishhnu, ashTaka
Location : doc_vishhnu
Latest update : January 23, 2021
Send corrections to : sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 23, 2021

*sanskritdocuments.org*

# Shriman Narayana AshtAkshari Stutih

# શ્રીમન્નારાયણાષ્ટાક્ષરીસ્તુતિઃ

ૐ નમો નારાયણાય ।

ૐ- નમઃ પ્રણવાર્થાર્થ સ્થૂલસૂક્ષ્મ ક્ષરાક્ષર ।
વ્યક્તાવ્યક્ત કલાતીત ૐકારાય નમો નમઃ ॥ ૧॥

ન- નમો દેવાદિદેવાય દેહસઞ્ચારહેતવે ।
દૈત્યસઙ્ઘવિનાશાય નકારાય નમો નમઃ ॥ ૨॥

મો- મોહનં વિશ્વરૂપં ચ શિષ્ટાચારસુપોષિતમ્ ।
મોહવિધ્વંસકં વન્દે મોકારાય નમો નમઃ ॥ ૩॥

ના- નારાયણાય નવ્યાય નરસિંહાય નામિને ।
નાદાય નાદિને તુભ્યં નાકારાય નમો નમઃ ॥ ૪॥

રા- રામચન્દ્રં રઘુપતિં પિત્રાજ્ઞાપરિપાલકમ્ ।
કૌસલ્યાતનયં વન્દે રાકારાય નમો નમઃ ॥ ૫॥

ય- યજ્ઞાય યજ્ઞગમ્યાય યજ્ઞરક્ષાકરાય ચ ।
યજ્ઞાઙ્ગરૂપિણે તુભ્યં યકારાય નમો નમઃ ॥ ૬॥

ણા- ણાકારં લોકવિખ્યાતં નાનાજન્મફલપ્રદમ્ ।
નાનાભીષ્ટપ્રદં વન્દે ણાકારાય નમો નમઃ ॥ ૭॥

ય- યજ્ઞકર્ત્રે યજ્ઞભર્ત્રે યજ્ઞરૂપાય તે નમઃ ।
સુજ્ઞાનગોચરાયાઽસ્તુ યકારાય નમો નમઃ ॥ ૮॥

ૐકારમન્ત્રસંયુક્તં નિત્યં ધ્યાયન્તિ યોગિનઃ । (ૐકારબિન્દુસંયુક્તં)
કામદં મોક્ષદં તસ્મૈ ૐકારાય નમો નમઃ ॥ ૯॥

નારાયણઃ પરં બ્રહ્મ નારાયણઃ પરં તપઃ ।
નારાયણઃ પરો દેવઃ સર્વં નારાયણસ્સદા ॥ ૧૦॥

ૐ નમો નારાયણાય ।

ઇતિ નારાયણાષ્ટાક્ષરીસ્તુતિઃ સમાપ્તા ।

*Shriman Narayana AshtAkshari Stutih*

pdf was typeset on May 23, 2021

Please send corrections to *sanskrit@cheerful.com*